श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे

# ॥ एकोनशततमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ एकोनशततमः सर्गः ॥

## श्रीरामरावणयोर्युद्धम्

महोदरमहापार्श्वौ हतौ दृष्ट्वा स रावणः।
तस्मिंश्च निहते वीरे विरूपाक्षे महाबले॥ **6.99.1** ॥

आविवेश महान् क्रोधो रावणं तु महामृधे।
सूतं सञ्चोदयामास वाक्यं चेदमुवाच ह॥ **6.99.2** ॥

निहतानाममात्यानां रुद्धस्य नगरस्य च।
दुःखमेवापनेष्यामि हत्वा तौ रामलक्ष्मणौ॥ **6.99.3** ॥

रामवृक्षं रणे हन्मि सीतापुष्पफलप्रदम्।
प्रशाखा यस्य सुग्रीवो जाम्बवान् कुमुदो नलः॥ **6.99.4** ॥

द्विविदश्चैव मैन्दश्च अङ्गदो गन्धमादनः।
हनूमांश्च सुषेणश्च सर्वे च हरियूथपाः॥ **6.99.5** ॥

स दिशो दश घोषेण रथस्यातिरथो महान्।
नादयन् प्रययौ तूर्णं राघवं चाभ्यधावत॥ **6.99.6** ॥

पूरिता तेन शब्देन सनदीगिरिकानना।
सञ्चचाल मही सर्वा त्रस्तसिंहमृगद्विजा॥ **6.99.7** ॥

तामसं सुमहाघोरं चकारास्त्रं सुदारुणम्।
निर्ददाह कपीन् सर्वांस्ते प्रपेतुः समन्ततः॥ **6.99.8** ॥

उत्पपात रजो भूमौ तैर्भग्नैः सम्प्रधावितैः।
नहि तत् सहितुं शेकुर्ब्रह्मणा निर्मितं स्वयम्॥ **6.99.9** ॥

तान्यनीकान्यनेकानि रावणस्य शरोत्तमैः।
दृष्ट्वा भग्नानि शतशो राघवः पर्यवस्थितः॥ **6.99.10** ॥

ततो राक्षसशार्दूलो विद्राव्य हरिवाहिनीम्।
स ददर्श ततो रामं तिष्ठन्तमपराजितम्॥ **6.99.11** ॥

लक्ष्मणेन सह भ्रात्रा विष्णुना वासवं यथा।
आलिखन्तमिवाकाशमवष्टभ्य महद् धनुः॥ **6.99.12** ॥

पद्मपत्रविशालाक्षं दीर्घबाहुमरिन्दमम्।
ततो रामो महातेजाः सौमित्रिसहितो बली॥ **6.99.13** ॥

वानरांश्च रणे भग्नानापतन्तं च रावणम्।
समीक्ष्य राघवो हृष्टो मध्ये जग्राह कार्मुकम्॥ **6.99.14** ॥

विस्फारयितुमारेभे ततः स धनुरुत्तमम्।
महावेगं महानादं निर्भिन्दन्निव मेदिनीम्॥ **6.99.15** ॥

रावणस्य च बाणौघै रामविस्फारितेन च।
शब्देन राक्षसास्तेन पेतुश्च शतशस्तदा॥ **6.99.16** ॥

तयोः शरपथं प्राप्य रावणो राजपुत्रयोः।
स बभौ च यथा राहुः समीपे शशिसूर्ययोः॥ **6.99.17** ॥

तमिच्छन् प्रथमं योद्धुं लक्ष्मणो निशितैः शरैः।
मुमोच धनुरायम्य शरानग्निशिखोपमान्॥ **6.99.18** ॥

तान् मुक्तमात्रानाकाशे लक्ष्मणेन धनुष्मता।
बाणान् बाणैर्महातेजा रावणः प्रत्यवारयत्॥ **6.99.19** ॥

एकमेकेन बाणेन त्रिभिस्त्रीन् दशभिर्दश।
लक्ष्मणस्य प्रचिच्छेद दर्शयन् पाणिलाघवम्॥ **6.99.20** ॥

अभ्यतिक्रम्य सौमित्रिं रावणः समितिञ्जयः।
आससाद रणे रामं स्थितं शैलमिवापरम्॥ **6.99.21** ॥

स राघवं समासाद्य क्रोधसंरक्तलोचनः।
व्यसृजच्छरवर्षाणि रावणो राक्षसेश्वरः॥ **6.99.22** ॥

शरधारास्ततो रामो रावणस्य धनुश्च्युताः।
दृष्ट्वैवापतिताः शीघ्रं भल्लाञ्जग्राह सत्वरम्॥ **6.99.23** ॥

ताञ्छरौघांस्ततो भल्लैस्तीक्ष्णैश्चिच्छेद राघवः।
दीप्यमानान् महाघोराञ्छरानाशीविषोपमान्॥ **6.99.24** ॥

राघवो रावणं तूर्णं रावणो राघवं तथा।
अन्योन्यं विविधैस्तीक्ष्णैः शरवर्षैर्ववर्षतुः॥ **6.99.25** ॥

चेरतुश्च चिरं चित्रं मण्डलं सव्यदक्षिणम्।
बाणवेगात् समुत्क्षिप्तावन्योन्यमपराजितौ॥ **6.99.26** ॥

तयोर्भूतानि वित्रेसुर्युगपत् सम्प्रयुध्यतोः।
रौद्रयोः सायकमुचोर्यमान्तकनिकाशयोः॥ **6.99.27** ॥

सततं विविधैर्बाणैर्बभूव गगनं तदा।
घनैरिवातपापाये विद्युन्मालासमाकुलैः॥ **6.99.28** ॥

गवाक्षितमिवाकाशं बभूव शरवृष्टिभिः।
महावेगैः सुतीक्ष्णाग्रैर्गृध्रपत्रैः सुवाजितैः॥ **6.99.29** ॥

शरान्धकारमाकाशं चक्रतुः परमं तदा।
गतेऽस्तं तपने चापि महामेघाविवोत्थितौ॥ **6.99.30** ॥

तयोरभून्महायुद्धमन्योन्यवधकाङ्क्षिणोः।
अनासाद्यमचिन्त्यं च वृत्रवासवयोरिव॥ **6.99.31** ॥

उभौ हि परमेष्वासावुभौ युद्धविशारदौ।
उभावस्त्रविदां मुख्यावुभौ युद्धे विचेरतुः॥ **6.99.32** ॥

उभौ हि येन व्रजतस्तेन तेन शरोर्मयः।
ऊर्मयो वायुना विद्धा जग्मुः सागरयोरिव॥ **6.99.33** ॥

ततः संसक्तहस्तस्तु रावणो लोकरावणः।
नाराचमालां रामस्य ललाटे प्रत्यमुञ्चत॥ **6.99.34** ॥

रौद्रचापप्रयुक्तां तां नीलोत्पलदलप्रभाम्।
शिरसाधारयद् रामो न व्यथामभ्यपद्यत॥ **6.99.35** ॥

अथ मन्त्रानपि जपन् रौद्रमस्त्रमुदीरयन्।
शरान् भूयः समादाय रामः क्रोधसमन्वितः॥ **6.99.36** ॥

मुमोच च महातेजाश्चापमायम्य वीर्यवान्।
ताञ्शरान् राक्षसेन्द्राय चिक्षेपाच्छिन्नसायकः॥ **6.99.37** ॥

ते महामेघसङ्काशे कवचे पतिताः शराः।
अवध्ये राक्षसेन्द्रस्य न व्यथां जनयंस्तदा॥ **6.99.38** ॥

पुनरेवाथ तं रामो रथस्थं राक्षसाधिपम्।
ललाटे परमास्त्रेण सर्वास्त्रकुशलोऽभिनत्॥ **6.99.39** ॥

ते भित्त्वा बाणरूपाणि पञ्चशीर्षा इवोरगाः।
श्वसन्तो विविशुर्भूमिं रावणप्रतिकूलिताः॥ **6.99.40** ॥

निहत्य राघवस्यास्त्रं रावणः क्रोधमूर्च्छितः।
आसुरं सुमहाघोरमस्त्रं प्रादुश्चकार सः॥ **6.99.41** ॥

सिंहव्याघ्रमुखांश्चापि कङ्ककोकमुखानपि।
गृध्रश्येनमुखांश्चापि शृगालवदनांस्तथा॥ **6.99.42** ॥

ईहामृगमुखांश्चापि व्यादितास्यान् भयावहान्।
पञ्चास्यान् लेलिहानांश्च ससर्ज निशिताञ्शरान्॥ **6.99.43** ॥

शरान् खरमुखांश्चान्यान् वराहमुखसंश्रितान्।
श्वानकुक्कुटवक्त्रांश्च मकराशीविषाननान्॥ **6.99.44** ॥

एतांश्चान्यांश्च मायाभिः ससर्ज निशिताञ्छरान्।
रामं प्रति महातेजाः क्रुद्धः सर्प इव श्वसन्॥ **6.99.45** ॥

आसुरेण समाविष्टः सोऽस्त्रेण रघुपुङ्गवः।
ससर्जास्त्रं महोत्साहं पावकं पावकोपमः॥ **6.99.46** ॥

अग्निदीप्तमुखान् बाणांस्तत्र सूर्यमुखानपि।
चन्द्रार्धचन्द्रवक्त्रांश्च धूमकेतुमुखानपि।
ग्रहनक्षत्रवर्णांश्च महोल्कामुखसंस्थितान्॥ **6.99.47** ॥

विद्युज्जिह्वोपमांश्चापि ससर्ज विविधाञ्छरान्।
ते रावणशरा घोरा राघवास्त्रसमाहताः॥ **6.99.48** ॥

विलयं जग्मुराकाशे जघ्नुश्चैव सहस्रशः।
तदस्त्रं निहतं दृष्ट्वा रामेणाक्लिष्टकर्मणा॥ **6.99.49** ॥

हृष्टा नेदुस्ततः सर्वे कपयः कामरूपिणः।
सुग्रीवाभिमुखा वीराः सम्परिक्षिप्य राघवम्॥ **6.99.50** ॥

ततस्तदस्त्रं विनिहत्य राघवः
प्रसह्य तद् रावणबाहुनिःसृतम्।
मुदान्वितो दाशरथिर्महाहवे
विनेदुरुच्चैर्मुदिताः कपीश्वराः॥ **6.99.51**॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे एकोनशततमः सर्गः॥